॥ ओ३म् ॥
लोकरंजनमेवात्र राज्ञां धर्मः सनातनः।
सत्यस्य रक्षणं चौव व्यवहारस्य चार्जवम्॥
महा0शान्ति0 57/11

न कस्यचित्कस्यचिदिह स्वभावाद्
भवत्युदारोऽभिमतः खलो वा।
लोके गुरुत्वं विपरीततां वा
स्वचेष्टितान्येव नरं नयन्ति ॥
( हितोपदेश - 2/46 )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26

Posting Date.: 4-5, 19-20 of Every Month

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१

ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
कृते प्रति कृतिं कुर्यात्
हिंसने प्रति हिंसितम् ।
तत्र दोषं न पश्यामि
शठे शाठ्यं समाचरेत् ॥
( नीतिसारसङ्ग्रहः )
मनसा कर्मणा वाचा
परस्वादानहेतुतः।
प्रपतन्ति नराः सम्यग्
लोभोपहतचेतसः॥
( देवीभागवत - 3/16/49 )

卐 वर्षम्-१४ 卐 अंकः-०४ ( ३१६ ) नवदेहली 卐 १५ अगस्तमासः २०२४ 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-८

## भारतं सांस्कृतिक दृष्ट्या सर्वदा अखण्डितमेव-श्रीनिवासवरखेड़ी

दिल्ली, (अजयकुमारमिश्रा)

केन्द्रीयसंस्कृतविश्वविद्यालय, दिल्ली इत्यस्य कुलपतिः प्रो श्रीनिवासवरखेड़ी स्वतन्त्रता दिवसम् उपलक्ष्य स्वीये अध्यक्षीय उद्बोधने कथितवान् यद् भारतं सांस्कृतिक दृष्ट्या सर्वदा सर्वथा च अखण्डितमेवस तेन माननीयस्य प्रधान मन्त्रिणः विकसित भारतस्य संकल्पान् उद्धरन् उक्तं अस्य लक्ष्यं न केवलं भारतम्, अपितु समग्र विश्वस्य कल्याणः। संस्कृत वाङ्मयः एव राष्ट्रस्य वैश्विक भावनायाः एकात्म भावबोधेन एतदर्थं तेन राष्ट्र पंचायनस्य (उपासना) मूलभूत पञ्च तत्त्वानां रुपेण संविधानं, रक्षा ,राष्ट्र ध्वज सम्माननं ,राष्ट्र संस्कृतिः, वाङ्मय परम्परा, भाषा परम्परा इत्येषां महत्त्वं व्यापकतया प्रकाशः क्षिप्तः। तेन मानितं संविधान रक्षायै स्वीय कर्तव्यस्य पालनं करणीयम्।



शेषभागः द्वितीयेपुटे




## संस्कृतभारत्या संस्कृतभाषायां शपथग्रहीतवन्तानां सांसदानाम् अभिनन्दनम्

नवदेहली। राजधान्यां संसदभवनस्य समीपे स्थिते पार्लियामेंटे संस्कृतभारती मुख्यसमितिकक्षे संस्कृतभाषायां सांसदपदस्य शपथग्रहीतवतां सांसदानाम् एकस्मिन् भव्यसमारोहे अभिनंदनं कृतम्। समारोहस्य अध्यक्षतां केंद्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः श्रीनिवासबरखेड़ी कृतवान् स केंद्रीयशिक्षाराज्यमंत्री सुकांतमजूमदारः



मुख्यातिथिः आसीत्। संस्कृतभारत्याः अखिलभारतीयसंगठनमंत्री दिनेशकामतः कार्यक्रमे मुख्यवक्ता आसीत्। केंद्रीयशिक्षाराज्यमंत्री डॉ. सुकांतमजूमदारः उक्तवान् यत् देशस्य सर्वासु भाषासु संस्कृतं सर्वतः जीवन्ती भाषा अस्ति भविष्यति काले अपि भविष्यति च। सः संस्कृतस्य संवर्धनाय संरक्षणाय च सदैव सहयोगं दातुं संकल्पं स्वीकृतवान्। संस्कृतभारत्याः अखिलभारतीयसंगठनमंत्री दिनेशकामतः संस्कृते सांसदानां स्वागतमभिनन्दनञ्च कृतवान्। श्रीकामतः अस्मिन् अवसरे उक्तवान् यत् संस्कृतं प्रति अनुरागेणैव संस्कृतस्य गौरवं निरंतरं वर्धते। स देशस्य सांसदाः संस्कृतेन शपथग्रहणम् एव संस्कृतस्य संवर्धनं मानवर्धनं च अस्ति। समारोहस्य अध्यक्षः संस्कृतभारत्याः उपाध्यक्षः केंद्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिश्च श्रीनिवासबरखेड़ी उक्तवान् यत् संस्कृतैव अस्माकं संस्कृतिः अस्ति। संस्कृते संस्कृतस्य क्षेत्रमेव अस्माकं जीवनस्य ध्येयम्। सांसदाः संस्कृतेन शपथं स्वीकृत्य संसदे संस्कृतस्य गरिमाणं वर्धितवन्तः।

## देशस्य ७८तमे स्वतंत्रतादिवसस्य अवसरे पतंजलियोगपीठे ध्वजारोहणम्

### बलिदानीनां स्वप्नान् पूरणे पतंजलिः प्रयासरतः -, आचार्यः बालकृष्णः

हरिद्वारम्, 15 अगस्त। देशस्य 78तमे स्वतंत्रतादिवसस्य अवसरे पतंजलिः योगपीठं पतंजलिः विश्वविद्यालयस्य च अध्यक्षः स्वामी रामदेवः पतंजलिः विश्वविद्यालयस्य कुलपतिः आचार्यः बालकृष्णः च ध्वजारोहणं कृत्वा सर्वान् देशवासीनः स्वतंत्रतादिवसस्य शुभकामनाः दत्तवन्तौ। ध्वजारोहणात् पश्चात् राष्ट्रगीतं वंदेमातरम् द्वारा




सम्पूर्ण वातावरणं राष्ट्रप्रेमस्य वर्णे वर्णितं आसीत्।

कार्यक्रमे स्वामी रामदेवः उक्तवान् यत् भारतस्य स्वतन्त्रता निमित्तं भारतस्य पंचलक्षाधिक वीर-वीरांगनानां ऋषि-ऋषिकानां च बलिदानं दत्तवन्तः। वयं स्वतन्त्रतायाः 78तमे स्वाधीनतादिवसे एतत् संकल्पं स्वीकृतवन्तः यत् अस्मिन् देशे राजनैतिक स्वतंत्रताभिः सह शिक्षा, चिकित्सा, आर्थिक, सांस्कृतिक, वैचारिक स्वतन्त्रता एवं रुग्णता, दुर्व्यसनेभ्यः च अयं देशं स्वातन्त्र्यं कुर्मः स भारतं स्वस्थं, समृद्धं संस्कारवानं च, परमवैभवशालीं च रचयितुं पतंजलिः पक्षतः एकां महती भूमिकां निर्वोष्यामः।

शेषभागः द्वितीयेपुटे

# सम्पादकीयम्

संसरतीति संसार:' इति व्युत्पत्या सर्वोऽपिसांसारिक पदार्थ: प्रतिक्षणं परिवर्तन। तस्मित्रैव समेऽपि प्राणिन:, जन्तव:, निर्जीव वस्तूनि चान्तर्भूतानि भवन्ति। एतेष्वेका बुद्धिरपि वर्तते, या हि वस्तुत: समग्रस्यापि व्यवहारस्य सञ्चालिका। यतोऽस्याश्चिन्तनपद्धत्यैव वयं जीवाम: ।

बान्धवा:। यथा देशस्य सम्यक प्रशासनाय किञ्चित् संविधानम् आवश्यकन्तथैवास्माकं जीवनगति: सुचारुविधिना अग्रेसरा भवेत्, सार्थकतया च वयं जीवमैतदर्थम् अस्मभ्यमपि कंपाञ्चन मार्गनिर्देशनम् आवश्यकम्भवति। प्राचीनभारते तु नासीत् जीवनमार्गनिर्देशकानाम् अल्पत्वं तदानीं स्वतपस्तेजसा सर्वविधज्ञानसम्पन्नानां महर्षीणाम् आचार्याणाञ्च बाहुल्यात्, परन्तु अद्यत्वे नास्ति तादृशी सम्पन्नता भारतस्य अन्यस्य वा कस्यचिद् देशस्या अत: साम्प्रतिकानां जनानां मार्गनिर्देशाय आवश्यकत्वं भजते तादृशं किमपि विलक्षणं वस्तु, तच्च विशिष्टैर्जनहितेच्छुक : शोध कर्तृभि: क्रियमाण: शोध एव। तेषां विशिष्टप्रयासेनैव सम्प्रति वयं विकासयुगे जीवाम:, यतो वैज्ञानिकैरन्यैश्च क्रियमाणा: शोधा एवास्मान् विभिन्नकार्येषु दैनिकचर्यासु च प्रवर्तयन्ति।

परन्तु पूर्वोक्तानां संस्कृतनिष्ठानां महर्षीणां वंशजा: वयं किमद्यत्वे तेषां कार्यभार वहन्त: स्म:? किमस्माभिरपि संस्कृतमाध्यमेन समाजोपकारका विषया: समाजाय प्रदीयन्ते? शोधकार्याणि तु वयमपि कुर्म:, परन्तु किम् अस्माकं शोधकार्याणां लेशमात्रमपि लाभ: समाज: प्राप्नुवन् अस्ति? नैव खलु तर्हि सन्दर्भेऽस्मिन् साम्प्रतिकै: विद्वद्वरेण्यै: प्रशासनाधिकारिभि:, शिक्षाक्षेत्र उच्चपदासीनैर्वाऽवश्यमेव योजनीया: संस्कृतच्छात्रा:, येनाद्यापि संस्कृतज्ञत्वेन ख्यातिमाप्नुवन्तो वयं संस्कृतनिष्ठज्ञानं समाजाय दातुं प्रभवेम। शास्त्राण्यस्माकं द्विधा लोकोपकारकानि भवितुम् अर्हन्ति- साक्षात, परम्परया च। तत्र वेद-उपनिषत् साहित्य-धर्मशास्त्र-आयुर्वेद योग- ज्यौतिष-दर्शनप्रभृतिशास्त्राणि साक्षात् लोकोपकारकाणि भवन्ति चेत् न्याय-व्याकरणदिविषया: परम्परया लोकमुपकर्तुम् अर्हन्ति। अत: सर्वैरपि संस्कृतनिष्ठै: विद्वद्भि: छात्रद्वारा क्रियमाणं करिष्यमाणं वा शोधकार्य प्रायो लोकोपकारकमेव भवेदिति सर्वथा प्रयत्यते चेद् अवश्यमेवानेन सुप्रयासेन संस्कृतं लोकोप्सितम्भविष्यतीति मे विश्वास इति शम्।

भवदीया

सम्पादिका

प्रथमपुटस्य शेषभाग:**भारतं सांस्कृतिक....**

अस्य राष्ट्रोत्सवस्य मुख्यातिथिरुपेण राष्ट्रिय संस्कृत विश्वविद्यालय, तिरुपति इत्यस्य माननीयकुलपति: प्रो जी.एस.आर. कृष्ण मूर्ति: भारतस्य स्वतन्त्रताया: छत्रपति शिवाजि:, वीर पृथ्वीराज:, महर्षिअरविन्द:, लोकमान्य तिलक: , महात्मा गांधी महापुरुषाणां योगदानानि चर्चितानि । राष्ट्रिय भावनया पूर्णं 'स्वतन्त्रत-भारतमिति' नामिकाया: स्वरचितस्या: एकस्या: संस्कृतकविताया: सस्वरं पाठोऽपि अभवत्। सम्मानितातिथि रुपेण अखिल भारतीय चेस संघस्य उपाध्यक्ष: तथा टी टी डी भक्ति इति पटलस्य निदेशक: टी टी डी (तिरुपति देवस्थानम्)इत्यस्य पूर्व समिति सदस्य: डा डी पी अनन्त: कथितवान् यद् स्वतन्त्रता सेनानिन: स्व प्राणान् त्यक्त्वा अस्मभ्यं स्वतन्त्रतां दत्तवन्त:। अस्य कार्यक्रमस्य मंच संचालनं प्रो मध ुकेश्वर भट्ट:, निदेशक योजना (केन्द्रीय) कुलपति विशेष कार्याधिकारी अकरोत्। कार्यक्रमस्य श्रीगणेश: केन्द्रीय संस्कृत विश्वविद्यालयस्य कुलगीतेन समापनं राष्ट्रगानेन अभवत् । उल्लेखनीयं यद् अस्मिन् कार्यक्रमे केंद्रीय संस्कृत विश्वविद्यालयस्य परिसरेभ्य: औन लाईन माध्यमेन छात्रा: भागम् अगृह्णन्। एतान् अतिरिच्य सीएसयू , दिल्ली मुख्यालयस्य छात्रच्छात्रा: कर्मयोगिन:, अधिकारिण:,कला संकाय सदस्या: सपरिवारं तत्र भागं गृहीतवन्त:।

प्रथमपुटस्य शेषभाग:

## देशस्य ७८तमे स्वतंत्रतादिवसस्य......

वयं पतंजलि: गुरुकुलम्, आचार्यकुलम्, पतंजलि: विश्वविद्यालयस्य भारतीयशिक्षापरिषद: माध्यमेन च एतादृशी संस्कारमूलकस्य शिक्षाया: बीजं अस्मिन् देशे बपिष्यन्ति येन देशस्य नवीन पीढ़ी शिक्षाया: स्वाधीनतां प्राप्नुयात्। स: उक्तवान् यत् बांग्लादेशे अल्पसंख्यकेषु हिन्दुषु, तेषां व्यवसायिक-प्रतिष्ठनेषु मंदिरेषु च ये प्रहारा: भवन्ति, तस्य स्थानस्य सर्वकार: तान् झटिति अवरोधयन्तु कार्यक्रमे आचार्य: बालकृष्ण: उक्तवान् यत् येन संकल्पेन सह वीरा:, बलिदानिन: च अयं देशं स्वतंत्रं कर्तुं स्वाहुतिं दत्तवन्त:, अस्मान् अस्मिन् स्वतंत्र-वायुमण्डले जीवनस्य अधिकारं दत्तवन्त: च, तान् स्मरणं कुर्वन् तेषां प्रति अस्माकं वास्तविकी श्रद्धांजलि: एतदेव भविष्यति यत् वयं स्व देशस्य निर्माणाय सर्वविदप्रयासं कृत्वा तेषां वीराणां-बलिदानीनां च स्वप्नदेशस्य निर्माणाय स्व भूमिकां निर्वोढयन्तु। अस्य कार्याय पतंजलि-योगपीठं अहर्निशं संलग्नं अस्ति। कार्यक्रमे पतंजलि गुरुकुलम्, आचार्यकुलम्, पतंजलि-विश्वविद्यालयस्य छात्रा: च देशभक्तिपूर्णा: सांस्कृतिक-प्रस्तुतय: उपस्थितानां जनानां मनसि राष्ट्रप्रेमण: भावनाया: संचार: कृत:। अस्मिन् अवसरे नेपालराष्ट्रस्य प्रबुद्धजनै: सहितं संस्थानेन सम्बद्धा: समस्त इकाईनां शैक्षणिकसंस्थानानां अधिकारिण:, कर्मयोगिन: , छात्रा: पतंजलि-संन्यासाश्रमस्य संन्यासी भ्रातर: साध्वी भगिन्य: च उपस्थिता: आसन्।

# 'दिल्लीसंस्कृताकादमीद्वारा स्वतन्त्रतादिवसमुपलक्ष्य अखिलभारतीयसंस्कृतकविसम्मेलनमनुष्ठितम्'

नव दिल्ली, ऐषम: अगस्त-एकादश्यां, दिल्लीसंस्कृताकादम्या स्वतन्त्रतादिवसस्य अष्टसप्ततितमीं वर्षग्रन्थिम् उपलक्ष्य हिन्दी भवनस्य विशाले सभागारे एकं भव्यमखिलभारतीयसंस्कृतकवि सम्मेलनम्




आयोजितम्। एतस्मिन् विशिष्टे अवसरे संस्कृतसाहित्यस्य उत्कृष्टकवय: नैजी: नैजी: अनुपम-रचना: संश्राव्य श्रोतृजनानां मनांसि मोहितवन्त:। इमे कवय: आसन्-आचार्य: भागीरथीनन्द:, आचार्य: कृष्णचन्द्र: त्रिपाठी, आचार्य: दयालसिंहपवार:, आचार्य: आशुतोषदयालमाथुर:, डॉ. अञ्जू राणी, डॉ. राजकुमारमिश्र:, डॉ. परमानन्द: झा:, डॉ ऋषिराज: पाठक:, डॉ. सर्वेशकुमारमिश्र:, डॉ. युवराज: भट्टराई च।

अस्मिन् सम्मेलने समस्त देशत: आहत्य उपरिप्रतिपादिता: प्रतिष्ठिता: दश कवय: समाकारिता: आसन्, एतेषु कविषु डॉ. युवराजभट्टराई वर्य: अपि अन्यतम: अवर्तत, साहित्याकादमीयुवपुरस्कारभाजनीभूत: समर्हणीयश्चैसौ कवि: दिव्यभावभरितां अद्वितीयामेकां संस्कृतकवितां प्रास्तौत। एतदीया कविता न केवलं श्रोतृजनान् मंत्रमुग्धान् अकरोत् , प्रत्युत जनेषु विशेषतश्च बालकेषु नैतिकता-स्वतन्त्रता- सामाजिक-मूल्यानां भावना: गहनतया स्पृष्टवान्।

डॉ. युवराजस्य बालसाहित्यपरा रचना भारतस्य समृद्धसांस्कृतिकरिक्थस्य संस्कृतभाषायाश्च महात्तामपि प्रादर्शयत, येन समेसपि उपस्थिता: श्रोतार: मुग्धीभूता: प्रेरिताश्च। एतस्य प्रदर्शनं न केवलम् कवितावाचनमेवासीत्, अपितु एक: अनुभव: आसीत, येन देशभक्ते: रंगरञ्जित: उत्सव: अतौपि विशेष: सञ्जात:।

अनेन आयोजनेन इदं सिद्धं यत् संस्कृत भाषायामद्यापि तदेव आकर्षणमस्ति प्रेरणाशक्तिरस्ति, येन संस्कृतवाङ्मयं समस्तस्य भारतीयसाहित्यस्य उपजीव्यत्वं जायते। एतत् कविसम्मेलनं न केवलं स्वतन्त्रतादिवसस्य उत्सव: आसीत्, प्रत्युत भारतीयसंस्कृते: संस्कृतभाषाया: च संवाहकानां सम्मेलनमपि आसीत्। दिल्लीसंस्कृताकादमीद्वारा आयोजितमिदं कविसम्मेलनं, आराष्ट्रे संस्कृतसाहित्यं नवीनशिखरसानौ प्रापणस्य दिशि एक: महत्वपूर्ण: पदक्षेप: वर्तते। एतन्निभै: आयोजनै: न केवलं नव्यपीठिकाजनै: संस्कृताध्यायनं प्रति प्रेरणा प्राप्यते, अपितु एतद् अस्माकं सांस्कृतिकं रिक्थं सुरक्षितुम् अपि योगदानं ददाति।

# 'केंद्रीय राज्य परिवहनमन्त्रिण: हर्षमल्होत्रस्य वित्तीयनियोजनविषये विवरणम्: राष्ट्रस्य प्रगतये समृद्धये च महत्वपूर्णं पादम्'

लेखक: देवेन: एस. खत्रि:, प्रसिद्ध: संस्कृत संवाददाता'

नवदेहली, १२ अगस्त:, २०२४-केंद्रीय राज्य परिवहनमन्त्री श्री हर्षमल्होत्र: नवतया वित्तीयनियोजनस्य प्रमुखानां प्रावधानानां विषये



विस्तृतं विवरणं प्रदत्तवान्। तस्मिन्नेव समये स: न केवलं विभिन्नेषु प्रावध ानेषु चर्चां कृतवान्, अपितु कथं वित्तीयनियोजनं राष्ट्रस्य आर्थिकप्रगते: नवमानं दास्यति इति अपि अवगतवान्।

'बुनियादी ढांचे प्रति विशेषं ध्यानम्'

श्री हर्षमल्होत्र: उक्तवान् यत् अस्मिन् वित्तीयनियोजने बुनियादी ढांचे विकासाय 'रुपये१० लाखकोटि:' धनराशि: निर्धारिताऽस्ति। एषा धनराशि: राष्ट्रस्य विविधेषु स्थलेषु पथानां, पुलानां, रेल्वेयानां, विमानस्थानकानां च निर्माणाय उपयोगिता भविष्यति, येन राष्ट्रे यातायात: परिवहनं च नवीनं वेगं प्राप्स्यत:।

'स्त्रीशक्तिकरणं च स्त्रीकेंद्रित अर्थव्यवस्था'

स्त्रीणां सशक्तिकरणाय वित्तीयनियोजने 'रुपये१.५ लाखकोटि:' ध नराशि: निर्धारिताऽस्ति। एषा धनराशि: स्त्रीभ्य: रोजगारसमीक्षाय सुवलंबीकरणाय नूतनानां योजनानां आरम्भे च उपयोगिता भविष्यति। एतत् वित्तीयनियोजनं स्त्रीसशक्तिकरणस्य दिशा उन्नायनाय महत्वपूर्णं पादं भविष्यति।

'स्वास्थ्यं शिक्षा च वर्धमानम्'

स्वास्थ्यं शिक्षा च क्षेत्रयो: वित्तीयनियोजने 'रुपये२.५ लाखकोटि:' धनराशि: निर्धारिताऽस्ति। अस्मिन वित्तीयनियोजने नवा: सुपर स्पेशलिटी चिकित्सालयानां निर्माणाय योजना: सन्ति, येषु अत्याधुनिकं चिकित्सा सुविधा भविष्यति। शिक्षाक्षेत्रे अपि नूतन विद्यालयानां महाविद्यालयानां च स्थापनााय पर्याप्ता धनराशि: निर्धारिताऽस्ति।

'युवानां इंटर्नशिप कार्यक्रम:'

युवानां रोजगारं कौशलविकासं च उद्दिश्य अस्मिन वित्तीयनियोजने एक: विशेष: इंटर्नशिप कार्यक्रम: उद्घोषित:। अस्मिन कार्यक्रमे 'रुपये३,००० कोटि:' धनराशि: निर्धारिताऽस्ति। अस्या: योजनाया: अन्तर्गतं राष्ट्रव्यापि युवानां लाखानां इंटर्नशिपस्य अवसरा: प्रदास्यन्ते, येन ते स्वकौशलं निखिलं कृत्वा भविष्ये रोजगारं प्राप्स्यन्ति।

'परिवहनक्षेत्रे सुधार:'

केंद्रीय राज्य परिवहनमन्त्री वित्तीयनियोजने परिवहनक्षेत्रे निध ारिणस्य विशेषतया जोरं कृतवान्। स: उक्तवान् यत् वित्तीयनियोजने 'रुपये१.२ लाखकोटि:' धनराशि: परिवहनक्षेत्रे सुधाराय निर्धारिताऽस्ति। एषा धनराशि: दिल्लीमेट्रो तथा अन्यमहानगराणां मेट्रोनटवर्कस्य विस्ताराय, अपि च रेल्वेयस्य आधुनिकीकरणाय उपयोगिता भविष्यति।

'हरित ऊर्जा च सौर ऊर्जा प्रति विशेषं ध्यानम्'

श्री हर्षमल्होत्र: वित्तीयनियोजने हरितऊर्जा प्रावधानेषु अपि प्रकाशं कृतवान्। स: अवदत् यत् सरकारया सौरऊर्जा विस्ताराय 'रुपये२०,००० कोटि:' धनराशि: निर्धारिताऽस्ति। अस्या: योजनाया: अन्तर्गतं राष्ट्रव्यापि '१ करोड़' गृहेषु सौरपटलानां स्थापिति: योजना अस्ति, येन विद्युत्पट्टिकेषु महती कमी भविष्यति तथा पर्यावरणसंरक्षणे च वृद्धि भविष्यति।

'कृषि ग्रामीणविकासे च वृद्धि:'

कृषि च ग्रामीणविकासाय वित्तीयनियोजने 'रुपये२ लाखकोटि:' धनराशि: निर्धारिताऽस्ति। एतद्वित्तीयनियोजनं कृषकाणां आयवृद्ध्यै ग्रामीणक्षेत्राणां च विकासाय महत्वपूर्णं पादं अस्ति।

'अंतरराष्ट्रीयपरिप्रेक्ष्ये वित्तीयनियोजनम्'

अन्ते, श्री हर्षमल्होत्र: अस्य वित्तीयनियोजनस्य अंतरराष्ट्रीयपरिप्रेक्ष्ये अपि चर्चां कृतवान्। स: उक्तवान् यत् एतद्वित्तीयनियोजनं न केवलं राष्ट्रस्य आंतरिकस्थितिं सुधारयितुं अपितु वैश्विकस्तरे भारतस्य आर्थिकस्थितिं प्रबलं कर्तुं अपि महत्वपूर्णं अस्ति। स: अवदत् यत् सरकारस्य एष: पाद: भारतं वैश्विकस्तरे एकं प्रबलं आर्थिकशक्तिरूपेण स्थापयिष्यति।

श्री हर्षमल्होत्रस्य एतत् भाषणं न केवलं वित्तीयनियोजनस्य समझाय महत्वपूर्णं, अपितु कथं एतद्वित्तीयनियोजनं राष्ट्रस्य विकासे समृद्ध्यां च योगदानं करिष्यति इति अपि स्पष्टं कृतवान्।

# विचारक्रांतिसाहित्यमंच माध्यमेन तुलसी-मानस-सम्मानसमारोहः सम्पन्नः

उज्जैनम्। गोस्वामितुलसीदासस्य जयंती-अवसरे विचार-क्रांतिः-साहित्यमंचस्य तत्वावधाने तुलसी-मानस-सम्मान समारोहस्य आयोजनं संस्कृति-संवाद पत्रिकायाः श्रीराम विशेषांकस्य लोकार्पणञ्च कृतम्।




रामजनार्दन मंदिरस्य महंत श्रीश्यामदासस्य सानिध्ये आयोजितम् अस्य समारोहस्य अध्यक्षतां प्रसिद्धः चित्रकारः कविः च डॉ. श्रीकृष्णजोशी कृतवान्। मुख्यातिथिः आचार्यः डॉ. सदानंद-त्रिपाठी दयालुः, विशिष्टातिथिः प्रसिद्धः कविः गजलकारः च कमलेशव्यासः कमलः आसन्। रुपांतरणसंस्थाने आयोजितं समारोहस्य शुभारंभः सरस्वतीदेव्याः, संत तुलसीदासस्य, मालवीकविः शिवराठौरशिवस्य चित्रेषु माल्यार्पणं कृत्वा दीपं प्रज्वल्य कृतम्। सरस्वतीवंदना आशीष श्रीवास्तवः अश्कः कृतवान्। तत्पश्चात् इशिकापांचालेन श्रीराम-वंदनायाः उपरि केंद्रितं भावपूर्णनृत्यं प्रस्तुतम् ।

अतिथिपरिचयः संस्थायाः सचिवः अनिलपांचालः सेवकः उक्तवान्। अतिथिसम्मानात् परं वरिष्ठसाहित्यकारः डॉ. दशरथ-मसानियां (आगर मालवा) राङ्कवं, श्रीफलम् अभिनन्दनपत्रं, स्मृतिचिह्नं च प्रदाय तुलसी-मानससम्मानं-2024 द्वारा सम्मानितवान् । सम्मानपत्रस्य वाचनं वरिष्ठआशुकविः नरेंद्रसिंहअकेला कृतवान्। डॉ. राजेशरावलसुशीलेन संपादिता लोकभाषायाः राष्ट्रीय-त्रैमासिकी-पत्रिका संस्कृतिसंवादस्य श्रीरामविशेषांकस्य विमोचनं कृतम् ।

आयोजने लोकभाषायाः वरिष्ठकविः स्वर्गीयः शिवराठौरशिवाय समर्पितं श्रीरामकाव्यगोष्ठ्याः अपि आयोजनम् अभवत्। यस्मिन् सर्वश्रीः अशोक-भाटी, रविनगाइचः, संदीपसृजनः, मिथिलेश-त्रिवेदी, अशोक-शर्मा, श्रीमती मायाबदेका, समर्थभावसारः, हरदीप-दायले, खूबचंद-कल्मोदिया, प्रकाशः,कोमलः, रचनानंदिनी सक्सेना, शारदाश्रीः, सुनीता राठौर, दीपक-स्वामी, सुखरामसिंहतोमरः, प्रशांतरूद्रः, लोकेशः डाबी, के पी एस चौहानः, रमेशचंद्र चांगेसिया महेश सोनी च श्रीरामाधारितानां स्वरचितानां रचनानां पाठं कृतवन्तः। सत्रे अस्मिन् संस्थया अतिथिमाध्यमेन युवाकलमकारः नन्दकिशोरपांचालः 'गंभीरः' उपनाम प्रदाय अंगवस्त्रेण सह उपनामपत्रं स्मृतिचिह्नं प्रदाय सम्मानितः।

आयोजनस्य संचालनम् अनिलपांचालसेवकः डॉ राजेशरावलसुशीलः च कृतवन्तौ। आभारः संस्थायाः अध्यक्षः कार्यक्रमसंयोजकः गीतकारः च सुगनचंदजैनः उक्तवान्।

# महाकवेः तुलसीदासस्य जयन्तीम् उपलक्ष्य विशिष्टव्याख्यानम् आयोजितम्

उज्जयिनी। महर्षिपाणिनिसंस्कृत-वैदिक विश्वविद्यालये ,उज्जयिन्याम् आधुनिकविभागस्य तत्वावधाने गोस्वामितुलसीदासस्य जयन्तीम् उपलक्ष्ये गोस्वामितुलसीदासस्य साहित्ये लोकमंगलमिति विषयम् अवलंव्य




विशिष्टव्याख्यानस्य आयोजनं 12.8.2024 दिनाङ्के सायं 4:30 वादने योगेश्वरश्रीकृष्णभवने कृतम्। मुख्यवक्तृरूपेण डॉ. रमेश-शुक्लः, व्याख्याता, व्याकरणविभागः श्री महाकालेश्वरवैदिकशोधसंस्थानम् ,उज्जैनं सभां सम्बोधितवान्। अध्यक्षतां माननीयः कुलगुरुः प्रो. विजयकुमारसीजी कृतवान्। साहित्यविभागाध्यक्षः डॉ. तुलसीदास-परोहा अपि सभां सम्बोधितवान। कार्यक्रमकार्यक्रमस्य प्रस्तावनास्वागतभाषणञ्च आधुनिकविभागे विभागाध्यक्षः कार्यक्रमे संयोजकः च डॉ.अखिलेश कुमार द्विवेदी प्रस्तुतवान्। डॉ. अनुरुद्ध त्रिपाठी गोस्वामितुलसीदासेन विरचितानां पदानां पाठम् अकरोत् । संचालनं हिन्दी-अध्यापिका डॉ. अनीताअग्रवाल धन्यवादम् आङ्ग्ल-प्राध्यापकः श्रीवेदांशुगौतमः च कृतवान्। कार्यक्रमे अस्मिन् डॉ. शुभमशर्मा, डॉ अनिलमुवेलः, डॉ. अजयराठी, अन्ये प्राध्यापकाः , विद्यार्थिनः, कर्मचारीगणः च उपस्थिताः आसन्।

# भारतीयज्ञान- परंपरां बौद्धधर्म- दर्शनं च अवलंव्य राष्ट्रियसंगोष्ठी आयोजिता

दरभंगा/बिहारः- ललितनारायण-मिथिला विश्वविद्यालय-दरभंगायाः स्नातकोत्तर संस्कृतविभागस्य डॉ प्रभातदास फाउंडेशन, दरभंगायाश्च संयुक्ततत्वावधाने 'भारतीय ज्ञान- परंपरां बौद्धधर्म - दर्शनञ्च' इत्येतद् विषयिणी राष्ट्रियसंगोष्ठी आयोजिता। उद्घाटन- तकनीकी- सत्रयोः पत्रवाचनं कुर्वन्तः सहभागिनः च 70 तः अधिकाः शिक्षकाः, शोध ार्थिनः, विद्यार्थिनः संस्कृतिप्रेमिणः च प्रमाणपत्राणि प्रस्तुतवन्तः।




मुख्यातिथि- रूपेण संस्कृत-विश्वविद्यालयस्य साहित्य-प्राध्यापकः डॉ.रीतेशकुमार-चतुर्वेदी राष्ट्रिय-शिक्षानीतेः 2020 विस्तरेण चर्चां कुर्वन् उक्तवान् यत् अस्यां शिक्षानीत्यां भारतीय-संस्कारस्य, संस्कृत्याः, नीत्याः, राष्ट्रीयता इत्यादीनां भारतीय- ज्ञान- परंपराणां विशिष्टं महत्वं प्रदत्तं विद्यते। भारतीयतां वयं सैद्धान्तिक-रूपेण आचरण-रूपेण च गृह्णीमः। यस्मिन् आत्मवत् सर्वभूतेषु.. वसुधैव कुटुंबकम्... इत्येषा भावना निहिता अस्ति। सः उक्तवान् यत् बौद्धधर्म-दर्शने त्यागपूर्वकं भोगस्य भावना अस्ति। सर्वेषु प्राणिषु दया-भावः वयं बौद्धधर्मदेव शिक्षितवन्तः, स बौद्धधर्म-दर्शनम् अस्मान् जीवनस्य कलां मानव-कल्याणस्य भावनां जागर्ति यद् भारतीयज्ञान- परंपरायाः महत्वपूर्णः भागोऽस्ति।

मुख्यवक्तृ-रूपेण मारवाड़ी-महाविद्यालयस्य संस्कृत-विभागाध्यक्षः डॉ विकाससिंहः उक्तवान् यत् बौद्ध-धर्म-दर्शनम् अतीव विस्तृतं मध्यम-मार्गी च, यस्य भारतीय-ज्ञान-परंपरायां आधिक्येन योगदानं वर्तते। बौद्ध-परंपरायां पञ्च प्रमुखाः परंपराः सन्ति, यासु शास्त्रार्थस्य प्रमुखता अस्ति। बुद्धे 32 महापुरुष- लक्षणानि आसन्। बुद्धः दुःखवादी नासीत् अपितु दुःखस्य कारणं बोधयित्वा सुखं प्रति चालक-दर्शनम् अस्ति।

विशिष्टातिथि- रूपेण संस्कृत-विश्वविद्यालयस्य व्याकरणशास्त्र-प्राध्यापिका डॉ साधनाशर्मा बौद्धधर्म- दर्शनस्य विस्तरेण चर्चां कुर्वती तस्य महत्वम् उल्लिखितवती। संस्कृते ज्ञानस्य कोषः वर्तते। अतः भारते ज्ञानस्य विपुलता भवति। या व्यक्तेः पूर्णं विकासाय समर्था विद्यते।

विशिष्ट वक्तृ रूपेण फाउंडेशन सचिवः मुकेश कुमार झाः कथितवान् यद् भारतीय ज्ञान- परंपरा अतिसमृद्धा तर्क- वितर्क युक्ता अवर्तत , यत्र सदा परिवर्तनं विकासश्च जायमानौ आस्ताम्।अध्यक्षीय संबोधने विभागाध्यक्षः डॉ घनश्याम महतो गोष्ठीविषयं विस्तृतं सारगर्भितं च बोधयन्नुक्तवान् यद् अनेके वैदिशिकेषु आक्रमणकारिषु आगतेषु सत्सु अपि भारतीय ज्ञान-परंपरा कदापि न समाप्ता ।

आगतानाम् अतिथीनां स्वागतं विषयं प्रवेशयन् संयोजकः डॉ आर एन चौरसिया बौद्धधर्म-दर्शनम् अद्य आधिक्येन प्रासंगिकं मन्वानः मानवतायाः समानत्वं कल्याणार्थं च प्रत्यपादयत्। उद्घाटन सत्रे ध न्यवाद ज्ञापनं कुर्वन् विभागीय प्राध्यापिका डॉ ममता स्नेही कथितवती यत् बौद्धधर्म-दर्शनं सर्वजन हिताय सर्वजन सुखाय अस्ति। यद् अस्मभ्यं दुःखेभ्यो दूरीकृत्य मोक्ष प्राप्ति मार्गं बोधयति।

आगतानाम् अतिथीनां स्वागतं पादप प्रदानेन विहितम् । अवसरेस्मिन् डॉ प्रियंका रायः, डॉ संजीव शाहः, डॉ संजीत रामः, डॉ राजीव कुमारः, डॉ रवि रामः, डॉ संजीव कुमारः, डॉ विरोध रामः, डॉ अवधेश कुमारः, डॉ शीला यादवः इत्येतैः सहिताः सप्तत्यधिकाः प्रतिभागिनो भागं गृहीतवन्तः, येभ्यः अतिथिभिः स्वहस्तैः प्रमाण पत्राणि प्रदत्तानि।




## पाठकानां कृते सूचना

कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# उत्तराखण्डविद्वत्सभा, भगवद्धामाश्रमः इत्यनयोः संयुक्ततत्वावधाने श्रावण्युपाकर्मोपनयनसंस्कारौ समनुष्ठितौ

हरिद्वारम्। 1008 महामण्डलेश्वरस्य डॉ स्वामिनो विवेकानन्दमहाराजस्य सानिध्ये राष्ट्रपतिपुरष्कृतस्य विदुषो डॉ० ओमप्रकाशभट्टस्य प्रेरणया उत्तराखण्डविद्वत्सभया श्रावणशुक्ल-पञ्चम्याः हस्तनक्षत्रस्य च विशिष्टसंयोगे मातुः गंगायाः पावनतटे हरिद्वारे श्री चंद्र-संस्कृत-महाविद्यालयस्य हरिद्वारस्थ विद्यालयत्रयस्य बटुकब्रह्मचारिणां उपनयनसंस्कारः तथा श्रावणी-उपाकर्म श्रीरामधामघाटे, हरिद्वारे संपादितः।

अध्यक्षः विजेंद्रममगाई उक्तवान् यत् अस्मिन् वर्षे 19 अगस्त तमे

शेषभागः अष्टमपुटे



## अष्टसप्ततितमः स्वाधीनतादिवसः



-महाचार्य्यःमनतोषःभट्टाचार्यः

जात्या वयं नु विविधा ननु भाषयापि
वर्णैः पुनर्बहुविधाश्च सुखाद्यभोज्यैः।
विश्वासधर्मनियमेऽपि बहुधा विभक्ताः
युक्ताः स्वतन्त्रदिवसं खलु पालयामः।।१।।

बाङ्गो भवेदपि भवेच्च विहारवासी
पञ्जावराज्यजनितश्च तथौत्कलीयः।
किम्वासमस्य तनयस्तनयोऽस्तु चान्ध्रो
मध्यप्रदेशजनितोऽथ हिमाचलस्थः।।२।।

मेघालयस्य तनयो गुजराटवासी
सिक्कीमकेरलतमीलसुतास्तिलङ्गाः।
गोयारुणाचलमिजोमणिदेहलीस्था
नागाश्च छत्तिशगडा ह्यपि झाडखण्डाः।।३।।

सर्वे तथोत्तरप्रदेशमहादिराष्ट्रास्-
स्थानान्तराजहरियाणसुतास्तथाच।
पुत्रा पुरस्य वयमुत्तरखण्डजाता
युक्तास्स्वतन्त्रदिवसं खलु पालयामः।।४।।((सन्दानितकम्))।।

ख्रीष्टानबौद्धजिनसेवकहिन्दवश्च
चार्वाकसौरगणपानुगशक्तिभक्ताः।
एवं भवन्ति बहवो ननु येषु कश्चित्
स्यादास्तिको भवति कश्चन नेशवादी।।५।।

इस्लामपन्थिसकलाः प्रभजन्ति चाल्लां
वेदे स्मृतौ च निगमे च पुराणशास्त्रे।
प्रोक्तं यदेव सकलं सततं हि सत्यं
मन्यन्त इत्थमपरे प्रवदन्ति भिन्नम्।।६।।

एवं समे निजमतं ह्यनुपालयन्तो
वर्षे वसन्ति सुखिनो ननु भारतेऽस्मिन्।
विस्मृत्य भेदविषयं वयमद्य सर्वे
युक्तास्स्वतन्त्रदिवसं खलु पालयामः।।७।।((युग्मकम्))।।

गान्धी सुभाषविपिनौ ह्यपिचारविन्दस्-
साभारकारतिलकौ जवहारलालः।
चान्ये भवन्ति बहवो ननु सैनिका ये
स्वाधीनतार्थमनिशं स्म पुरा यतन्ते।।८।।

तेभ्योऽष्टसप्ततितमे निजतन्त्रतायाः
पुण्ये दिने ननु वयं सकला नमामः।
कोऽप्यद्य पुण्यदिवसे ननु भारतीयो
राष्ट्रध्वजं न धरते स्वकरेण चोर्ध्वम्।।९।।

यूयं वयं किमपि तेऽपि च ता भवन्तो
ज्ञाज्ञा धनी न धनवांस्तरुणो वा वृद्धः।
त्यागी सुभोगनिरतो जटिलो गृही वा
युक्ताः स्वतन्त्रदिवसं खलु पालयामः।।१०।।

दाता सुखी सुकृपणो ह्यसुखी भवेद्वा
स्थूलो बली कृशतनुर्ह्यबली पुनश्च।
दीर्घाङ्गखर्वपतितापतिता वयं हि
युक्ताः स्वतन्त्रदिवसं खलु पालयामः।।११।।

आयान्तु भारतसुता दिवसे सुपुण्ये
स्वाधीनतार्जनतिथेस्सुमुहूर्तपूर्त्यै।
पुण्याष्टसप्ततितमे मिलिता वयं हि
युक्ताः स्वतन्त्रदिवसं खलु पालयामः।।१२।।

वर्णत्रयेण खचिता महती पताका
शौर्यादिभावजडिता सुखदा वरेण्या।
देशप्रसूकरधृता दिवसेऽद्य पुण्ये
शीर्षे गृहस्य सकलस्य सुशोभमाना।।१३।।


धृत्वा च यं निजकरे भरतस्य पुत्राः
सम्मानरक्षणकृते भयभावमुक्ताः।
यस्य स्वजीवनबलिं खलु दत्तवन्तः
राष्ट्रध्वजं तममलं हि वयं नमामः।।१४।।

स्वाधीनतां न लषते ननु कोऽस्ति मूढो
ह्यवाप्य तां न यतते ननु रक्षितुं कः।
का रक्षिता यदि वयञ्च सुरक्षितास्स्मो
जानाति नोत्तरमहो स च देशशत्रुः।।१५।।

राष्ट्रध्वजं न शिरसाथ नमस्करोति
पाषण्डधूर्तकपटं पुरुषाधमन्तम्।
धिक्कारमन्दवचसा यदि देशशत्रुं
निन्दामि नाहमहो क्व च देशभक्तः।।१६।।

# कालिदाससाहित्ये देवविमर्शः

-डॉ. मधुबाला शर्मा
विभागाध्यक्षः- साहित्यविभागः
जगद्गुरुरामानंदाचार्यराजस्थान
संस्कृतविश्वविद्यालयः जयपुरम्



धर्मप्राणमूलास्ति भारतीयसंस्कृतिः । आध्यात्मिकउन्नति-पापविमुक्ति-मोक्षप्राप्त्यर्थं भारतीयानां देवेषु अगाधश्रद्धा वर्तते । भगवतः क्रीड़ास्थलोऽयं संसारः यथोच्यते-"क्रीड़ार्थं सृजसि प्रपञ्चमखिलं क्रीड़ामृगास्ते जनाः"।ब्रह्मा-विष्णु-महेशश्चेति त्रिदेवानामवधारणा विद्यते भारतीयसंस्कृतौ। एतेषु देवेष्वेव द्युस्थानीयाः, अन्तरीक्षस्थानीयाः, पृथ्वीस्थानीयाश्च देवाः प्रभवन्ति । वेदेषु तथा च पुराणेषु सर्वत्र देवमहिममण्डनमवलोक्यते । यथा विष्णु धर्मोत्तपुराणे देवमहत्ता एवं प्रतिपादिता-

**देवाधीनाःप्रजाःसर्वा देवायत्तमिदं जगत्।**
**सुखदुःखे मानुषाणां देवायत्ते तथैव च।।**
**देवैर्विहितम श्ननन्ति मनुष्यास्तु शुभाशुभम्।**
**तस्मात्सर्वप्रयत्नेन देवपूजापरो भवेत्।।**[1]

देवानुकम्पया जनाः सुखं, राज्यं,स्वर्गं, मोक्षं च आप्नुवन्ति। देवाः स्वोपासकानां कल्याणाय सदैव तत्पराः भवन्ति । श्रीमद्भागवतपुराणे निगदितं यथा अग्निस्पर्शेन ईन्धनं भस्मीभूतं जायते तथैव देवसङ्कीर्तनेन नराणां पापं क्षीयते -

**अज्ञानादथवा ज्ञानादुत्तमश्लोकानाम यत्।**
**संङ्कीर्तनमघं पुंसो दंहेदेधो यथानलः ।।**[2]

कविकुलगुरुकालिदासस्य सर्वेषु काव्येष्वपि देवस्वरूपक्रियाकलापमहत्वञ्च प्राप्यते। कालिदासः वैदिक-पौराणिक-प्राकृतिक-अवतारीदेवानां च विस्तृतविवेचनं कृतवान् । तस्य काव्येषुविभिन्नदेवानां वर्णनमित्थं प्राप्यते।

**कालिदाससाहित्ये वैदिकदेवाः**

वैदिककालिकाः ऋषयः देवानां प्रत्यक्ष साक्षात्कारं कृत्वा रूपानुरूपं तेषां स्वरूपं वर्णितवन्तः। वैदिकदेवेषु अग्नि- इन्द्र-वरुण-मरुत्-सवितृ-अश्विनीकुमारादिदेवाःपरिगणिताः। कालिदासस्य काव्येषु यथास्थानं एतेषां स्वरूपं महत्वञ्च द्रष्टुं शक्यते। यथा -

**इन्द्रः**

वैदिकसाहित्ये इन्द्रः स्वर्गाधिपतिः "देवराजो" वा कीर्तितः। बहुभिः साक्ष्यैः ज्ञायते यत् शतयज्ञकर्ता इन्द्रपदमाप्नोति। अस्मात् कारणादेव स "शतक्रतु" इत्यभिधीयते। सन्दर्भेऽस्मिन् कालिदासेनोक्तम्'

**"तथा विदुर्मां मुनयः शतक्रतुं द्वितीयगामी न हि शब्द एष नः।"3**
**रघुवंशे इन्द्रस्य कृते शक्रेति शब्दस्य प्रयोगोऽपि प्राप्यते ।- 4**

रघुवंशे नृपस्य दिलीपस्य गर्भिणी महिषी सुदक्षिणाभिलषितवती यथा इन्द्रः स्वर्गं शासति तथैव मम पुत्रोऽपि पृथिव्यां शासनं करिष्यति। अत्रकालिदासः इन्द्रं 'मरुत्वान' नाम्ना सम्बोद्य स्वर्गाधिपतिरूपेण उल्लिखितवान् -दिवं मरुत्वानिव भोक्ष्यते भुवं

**दिगन्तविश्रान्तरथो हि तत्सुतः ।-5**

रघुवंशे इन्द्रस्य पत्नीपुत्रादीनां परिचय योऽपि लभ्यते। दिलीपसुदक्षिणयोः सुतोत्पत्तिसंन्दर्भे समाख्यातं यथा इन्द्र-शची श्जयन्तश नामधेयं स्वसुतमवाप्य मुदितौ तथैव दिलीप सुदक्षिणा चात्मजं रघुं प्राप्य हर्षितौ सञ्जातौ। वर्णितमस्ति-

**.....यथा जयन्तेन शचीपुरन्दरौ ।**
**तथा नृपः सा च सुतेन मागधी ननन्दतुस्तत्सदृशेन तत्समौ ।।-6**

कुमारसम्भवेऽपि कालिदासेन चित्रितं यत् पुलोमपुत्री शची इन्द्रपत्नीरूपेण राजते-

**"पुलोमपुत्रीं विबुधाधिभर्तुंस्ततः शची नाम कलत्रमेषः।" -7**

यज्ञस्य प्रथमभागे इन्द्रस्यैव अधिकारो भवतीति विश्रुतं यथाधोलिखितवर्णनेन प्रकटितम् -

**शतैस्तमक्ष्मणामनिमेषवृत्तिभिर्हरिं**
**विदित्वा हरिभिश्च वाजिभिः ।**
**अवोचदेनं गगनस्पृशा रघुः**
**स्वरेण धीरेण निवर्तयन्निव ।।**
**मखांशभाजां प्रथमो मनीषिभिः**
**त्वमेव देवेन्द्र! सदा निगद्यसे ।-8**

सहस्त्राक्षोऽस्ति इन्द्रः इति **"नेत्रसहस्त्रेण नोदयामास वासवः"**-9कुमारसम्भवमहाकाव्यस्यानेन -श्लोकांशेनापि स्पष्टं भवति ।कालिदासेनोल्लित इन्द्ररघोः युद्धवर्णनेनावबुध्यते इन्द्रस्यायुधः 'वज्रः' इति। पुरा सः वज्रेण पर्वतपक्षान् कर्तितवान। कथितम् -

**स चापमुत्सृत्य विवृद्धमत्सरः**
**प्रणाशनाय प्रबलस्य विद्विषः ।**
**महीध्रपक्षव्यपरोपणोचितं**
**स्फुरत्प्रभामण्लमस्त्रमाददे ।।-10**

रघुवंशे रघुदिग्विजयाख्याने चित्रितमस्ति पक्षकर्तनायोद्यतस्य शक्रस्योपरि शैलाः प्रस्तरैः प्रहृतवन्तः ।

**प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः ।**
**पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ।।-11**

पुनः रघुवंशस्य नवमे सर्गे दशरथवीरताविवेचने उक्त तथ्यस्य प्रमाणं तथा च इन्द्रः 'पुरन्दर' अभिधानेनापि अभिधीयते अस्य चर्चाऽपि कालिदासेन कृता -

**शमितपक्षबलः शतकोटिना**
**शिखरिणां कुलिशेन पुरन्दरः ।**
**स शरवृष्टिमुचा धनुषा द्विषां**
**स्वनवतां नवतामरसाननः ।।-12**

पुरुहूत इत्यपर नामधेयः इन्द्रः "ऐरावत" **गजे आरुढो भवति।-13** तथा च तस्य अश्वस्य नाम उच्चौश्रवास्तीति कुमारसम्भवे तारकासुरातङ्कसन्दर्भेकालिदासेनोदितम् -

**उच्चौरुच्चौःश्रवास्तेन हयरत्नमहारि च ।**
**देहबद्धमिवेन्द्रस्य चिरकालार्जितं यशः ।।-14**

कालिदासेन रघुवंशे इन्द्रः वृष्टिकारकेन देवरूपेणाऽपि चित्रितोऽस्ति -

**दुदोह गां स यज्ञाय सस्याय मघवा दिवमृ**
**सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्।।-15**

इत्थं कालिदासेन वैदिकसाहित्यसम्मतंइन्द्रस्य व्यक्तित्वं निरूपितम्।

**अग्निः -**

पृथ्वीस्थानीयदेवतासु अग्नेः प्रमुखं स्थानं विद्यते। ऋग्वेदस्य बहुमण्डलानां सूक्तानि याज्ञिकप्रधानतयाग्निदेवाय समर्पितानि। वैदिक मन्त्रेषु अग्निः 'ऋत्विक्', 'पुरोहितः' अथवा 'होता' नाम्नाभिधीयते ।यज्ञसम्पादनकाले सर्वप्रथमं अग्नेः आह्वानं क्रियते ।अयं देवतानां मुखस्वरूपोऽस्ति यज्ञेषु समर्पितं हविः देवान् प्रापयति येन स्वयज्ञभागमुपभुज्य देवाः पुष्टतामाप्नुवन्ति। यथा कालिदाससेन वह्नेः व्यक्तित्वमेवमुद्घाटितम् -

**यज्वभिः सम्भृतं हव्यं विततेष्वध्वरेषु सः ।**
**जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः ।। -16**

अग्निदेवः देवान्, पितृन् मनुजाञ्च मोदयति। देवोऽयं होतृगणान् स्वर्गं प्रापयति तथा च तपसः पूर्णं फलं प्रददाति । सूर्याय हविः प्राप्य अग्निः लोककल्याणमाचरति । सूर्याय हविः पर्जन्यरूपे परिवर्तयति येन वृष्टिर्भवति तथा च वृष्ट्याः अन्नमुद्भवति। अन्नेन समस्तसंसारस्य प्राणिनां पोषणं भवति। अस्मात् कारणादेव अग्निरखिललोकस्य पिता कथ्यते। कालिदासेनापि अग्निः प्राणदातृरूपेण प्रतिपादितः ।

**प्रीतः स्वाहास्वधाहन्तकारैः प्रीणयसे स्वयं ।**
**देवान्पितघ्न्मनुष्यांस्त्मेकस्तेषां मुखं यतः ।।**
**त्वयि जुह्वति होतारो हवींषि ध्वस्त कल्मषाः**
**भुञ्जन्ति स्वर्गमेकस्त्वं स्वर्गप्राप्तौ हि कारणम्।**
**हवींषि मन्त्रपूतानि हुताश! त्वमि जुह्वतः ।**
**तपस्विनस्तपः सिद्धिं यान्ति त्वं तपसां प्रभुः ।।**
**निधत्से हुतमकार्य स पर्जन्योऽभिवर्षति।**
**ततोऽन्नानि प्रजास्तेभ्यस्तेनासि जगतः पिता ।।**
**अन्तश्चरोऽसि भूतानां तानि त्वत्तो भवन्ति च।**
**ततो जीवितभूतस्त्वं जगतः प्राणदोऽसि च।।**
**जगतः सकलस्यास्य त्वमेकोऽस्युपकारककृत ।**
**कार्योपपादने तत्र त्वत्तोऽन्यः कः प्रगल्भते ।।**

अग्नेः वाहनं मेषोऽस्ति। इत्यस्मिन् विषये कालिदासेन कुमारसम्भवे वर्णितं यत् तारकासुरेण सह युद्धावसरे कार्तिकेयमनुगच्छन् वह्निः मेषारुढो भूत्वा याति।

**तमन्वगच्छद्गिरिश्रृङ्गसोदरंमदोद्धतं मेषमधिष्ठितः शिखी ।**
**विरोधिविद्वेषरुषाधिकंज्वलन् महोमहीयस्तरमायुधं दधत्।।-17**

अग्निदेवस्य पत्नी 'स्वाहा' वर्ततेति रघुवंशे उल्लिखितं यथा-

**अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम्।-18**

**वरुणदेवः -**

वैदिकदेवतासु वरुणः द्युस्थानीयो मन्यते सुन्दरस्वरुपयुक्तो देवोऽयं सहस्त्रनेत्रवान् वर्तते। अस्य आयुधः पाशोऽस्ति यथा रघुवंशे वर्णितम् -

**विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य ।-19**

वरुणदेवः स्वपाशेन दुष्टान् दण्डयति। कालिदाससाहित्ये अस्य संकेतः प्राप्यते

**'सवरुणावरुणाग्रसरं रुचा।-20**
**'पाणौ पाशः प्रचेतसः'।-21**

वरुणविषये विश्रुतिः वर्तते यत् देवोऽयं पापीजनान् जलोदररोगेण दण्डयति।अतःक्लिष्टनियमानुशीलनेन 'धृतव्रत' नाम्ना ज्ञायते।कालिदासेन कुमारसम्भवे कार्तिकेय-तारकासुरसंग्रामावसरे वरुणस्यायुध वाहनादि विषये निरूपितम्-

**नवोद्यदम्भोधरघोरदर्शने**
**युद्धायरुढोमकरेमहत्तरे ।**
**दुर्वारपाशो वरूणो रणोल्बणः**
**तमन्वियाय त्रिपुरान्तकात्मजम्।।-22**

**कालिदाससाहित्ये पौराणिकदेवताः**

'पुरा नवं भवतीति यास्कव्युत्पत्त्यानुसारंपुरातनपरम्पराः नवीनरूपे उद्घाटकाः ग्रन्थाः पुराणमित्यभिधीयते- 'पुरा अपि नवं पुराणम्' । पुराणेषु वेदोक्त दिव्यशक्त्याः मानवीकरणस्य प्रथा प्रारब्धा। वैदिककालीनदेवानां ईश्वररूपे स्तवनमभवत्। पौराणिकमान्यतानुसारं परमात्माथवा परब्रह्मेव श्भगवान्श इत्युच्यते तथा च भगवत्कृपयैव मोक्षप्राप्तिर्भवति। पौराणिककाले भागवत्तात्वस्य ब्रह्मा-विष्णु-शिव-गणेशादिस्वरूपे स्तवनं प्रस्तुतम्। कालिदासकाव्येषु उक्त पौराणिकदेवतानामपि विवेचना विद्यते।

**ब्रह्मा** -त्रिदेवेषु सर्वप्रथमं परिगणितः ब्रह्मा सम्पूर्णपुराणेषु सृष्टेः जनकरूपे कथितम् मुण्डकोपनिषदनुसारं ब्रह्मणः आविर्भावः सर्वप्रथमोऽभवत् यथोच्यते -

''ब्रह्मा देवनां प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता।'' अतएव देवोऽयं 'पितामहः' नाम्ना शब्दायते। कालिदासेन ब्रह्मणः सृजकस्वरूपमतीव सम्यक्तया समाख्यातम् । तेन कुमारसम्भवे वर्णितमस्ति यत् मूलप्रकृति ब्रह्मा पितृणां पिता तथा देवानामपि देवता विद्यते। अयं सृष्टेः सर्जकोऽस्ति एवं विधातेति अभिधीयते।

**त्वं पितृणामपि पिता देवानामपि देवता ।**
**परतोऽपि परश्चासि विधाता वेधसामपि।-23**

अपि च -

**सर्गशेषप्रणयनाद् विश्वयोनेरनन्तरं ।**
**पुरातनाः पुराविद्भिर्धातार इति कीर्तिताः ।।-24**

पौराणिकमान्यतानुसारं ब्रह्मणः उत्पत्ति भगवतः विष्णोः नाभिकमलादभूत् तथ्यमिदं रघुवंशे एवं वर्णितम् -**नाभिप्ररुढाम्बुरुहासनेनसंस्तूयमानः प्रथमेश धात्रा ।**
**अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान्पुरुषोऽधिशेते ।।**

कालिदाससाहित्ये ब्रह्मणः चतुर्मुखस्वरूपस्य विवेचनमपि प्राप्यते। विषयेऽस्मिन् कुमारसम्भवे कीर्तितम् -**अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम् -25**

एवं कालिदासः स्वकाव्येषु यथास्थानं ब्रह्मणः स्वरूपं प्रतिपादितवान् ।

**विष्णुः –** विष्णुः पुराणपुरुषरूपेण प्रथितोऽस्ति। भगवतः विष्णोः प्राकट्यं प्रतिपादयन् कालिदासेनोक्तम यथा ब्रह्मा विष्णोः प्राकट्येन सृष्टेः अमरतामन्यत् तथैव महाराज दिलीपः रघुजन्मना सूर्यवंशस्यस्थायित्वमवबोधयत् ।

**अमंस्त चानेन परार्घ्यजन्मना**
**स्थितेरभेत्ता स्थितिमन्तमन्वयम् ।**
**स्वमूर्तिभेदेन गुणाग्र्यवर्तिना**
**पतिः प्रजानामिव सर्गमात्मनः ।।–26**

**एकमात्र विष्णुरेव पुरुषोत्तमः मन्यते यथा कालिदासेन 'हरिर्यथैकः पुरुषोत्तमः स्मृतो'...27** इत्युल्लिखितम।विष्णुः अखिललोकस्य संचालकः कथितः । कालिदासेन रघुवंशे विवेचितम् यत् विष्णुः संसारसृष्टिं कृत्वा तस्य संरक्षणं करोति तथा चान्ते संहरति। इत्थं कर्ता-धर्ता-हर्ता च विष्णुरेवास्ति ।नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने –28

विष्णुः शेषनागशय्यायां विश्रमति पार्श्वमुपविश्य भगवती लक्ष्मीः तेषां चरणसेवां करोति। विष्णोः नयनं कमलतुल्यं वर्तते अतः कालिदासः तस्य कृते 'पुण्डरीकाक्ष' इति विशेषणं प्रयुक्तवान् विष्णुःपिताम्बरधारी विद्यते रघुवंशे तस्य वस्त्रस्योल्लेखः श्वालातपनिभांशुकम्‌ इति विशेषणेन निगदितम। तस्य वक्षस्थलः श्रीवत्सचिह्नेन कौस्तुभमणिना च शोभायमानोऽस्ति यथा – 'श्रीवत्सलक्षणं वक्षः कौस्तुभेनेव केशवम्'–29 इत्यनेन स्पष्टं भवति। विष्णोः आयुधानि चक्रगदादीनि सन्ति वाहनं च गरुड़ः । कालिदासः रघुवंशे विष्णोः व्यक्तित्वं विस्तरेण वर्णितवान् –

**भोगिभोगासनासीनं ददृशुस्तं दिवौकसः**
**तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहम्।**
**श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले**
**अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवे।**
**प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम्**
**दिवसं शारदमिव प्रारम्भसुखदर्शनम् ।**
**प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम्**
**कौस्तुभाख्यमपां सारं बिभ्राणं बृहतोरसा**
**बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः**
**आविर्भूतमपां मध्ये पारिजातमिवापरम्।**
**दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः**
**हेतिभिश्चेतनावद्भिरुदीरितजयस्वनम्**
**मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा**
**उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता-30**

कालिदासेन विष्णोः वैशिष्ट्यमुद्घाटयन् लिखितं यत् सामवेदस्य सप्तगीतेषु विष्णोः कीर्तनमेव विद्यते। अयं सप्तसमुद्रस्य जलेषु शयनं करोति। सप्तलोकस्याधारः तथा च सप्ताग्नीनां मुखमपि विष्णुरेवास्ति।सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम्।

**सप्तार्चिर्मुखमाचरन्युः सप्तलोकैकसंश्रयम् ।। –31**

विष्णुस्वचतुर्मुखेभ्यः चतुर्वर्ग-चतुर्युग-चतुर्वर्णानामुत्पत्तिमकरोत्। रघुवंशे अयं पुरातनकविरूपेण प्रतिपादितम् ।विष्णोः कण्ठ-ताल्वादि उच्चारणस्थलेष्वेव वाण्याः प्रादुर्भावो ऽभवत् ।

**पुराणस्य कवेस्तस्य वर्णस्थानसमीरता**
**बभूव कृतसंस्कारा चरितार्थैव भारती ।–32**

विष्णोः आयुधस्य सुदर्शनचक्रस्योल्लेखः कुमारसम्भवे 'हरिचक्रेण' शब्दद्वारा वर्तते।एवं कालिदासः विष्णोः वैशिष्ट्यं विस्तरेण वर्णितवान्।

**शिवः –**

कालिदाससाहित्ये शिवस्यार्धनारीश्वरस्वरूपं सम्यक्तया समाख्यातम्। यथा पति-पत्नी पृथक् भूत्वापि दाम्पत्यभावेन संयुक्तः प्रतीयते तथैव शब्दः अर्थश्चापि अभिन्नो भवति।रघुवंशमहाकाव्यस्य प्रथमश्लोके शिवस्याध 'नारीश्वरस्वरूपमवलोक्यते यथा–

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।**

**रघुवंशे वर्णितम् –** 'उमावृषाङ्कौ शरजन्मना'–33 इत्यनेन शिवपुत्रकार्तिकेयस्य तथा च शिववाहनवृषभस्य संकेतो प्राप्यते ।शिवः त्रिनेत्रधारी वर्तते इत्यस्मात् सः 'त्र्यम्बक' नाम्ना ज्ञायते। कालिदासकाव्ये अस्योल्लेख एवं लभ्यते – 'महेश्वरस्त्र्यम्बक एव नापरः ।'–34

कुमारसंम्भवे शिवपरिवारस्य विवेचनं मिलति तदनुसारं शिवस्य पूर्वपत्नी दक्षपुत्री श्सतीश आसीत् तस्यैव पुनर्जन्म पार्वती रूपेऽअभवत। तथ्योऽयं कालिदासेन एवमुक्तम् –

अथावमानेन पितुः प्रयुक्ता ।दक्षस्य कन्या भवपूर्वपत्नी ।।

**सती सती योगविसृष्टदेहा । तां जन्मने शैलवधूं प्रपेदे ।।–35**

शिवः शपिनाकश नामकं धनुः धारयति । यथा कुमारसम्भवे प्रस्तुतमस्ति –'कुर्या हरस्यापि पिनाकपाणे...36

शिवस्य मस्तके चन्द्रकला, कण्ठहस्तादिषु सर्पाः सुशोभिताः सन्ति।तस्य कण्ठस्य वर्णः नीलोऽस्ति। कालिदासकाव्येषु शिवस्वरूपं स्पष्टतया विवेचितम् –

**भुजङ्गमोन्नद्धजटाकलापं।**
**कर्णावसक्तद्विगुणाक्षसूत्रम् ।।**
**कण्ठप्रभासङ्गविशेषनीलां ।**
**कृष्णत्वचं ग्रन्थमतीं दधानम्।।**
**करेण शम्भोर्वलयीकृताहिना....**
**पादयोर्विकीर्णकेशासु परेतभूमिषु ...37**

शिव चिताभस्म-गजचर्म- ब्रह्मकपालमालाः च धारयति । तस्य एको हस्तः ब्रह्मकपालेन अपरहस्तश्च त्रिशूलेन सुशोभितो भवति। तथाचायं अस्थिनिर्मिताभूषणैः अलंकृतोस्ति।

**कालार्दितानां त्रिदशासुराणां ।**
**चितारजोभिः परिपाण्डुराङ्गम् ।।**
**महन्महेभाजिनमुद्गताग्र ।**
**प्रालेयशैलश्रियमुद्वहन्तम् ।।**
**पाणिस्थितब्रह्मकपालपात्रं ।**
**वैकुण्ठभाजाऽपि निषेव्यमाणम् ।।**
**नरास्थिखण्डाभरणं रणान्तमूलं।**
**त्रिशूलं कलयन्तमुच्चैः ।।**
**पुरातनी ब्रह्मकपालमालां ।**
**कण्ठे वहन्तं पुनराश्वसन्तीम्।।**
**उद्गीतवेदां मुकुटेन्दुवर्षत् ।**
**सुधाभरौघाप्लवलब्धसंज्ञाम् ।।–38**

एवं कालिदासेन शिवस्वरूपं सुष्ठुप्रकारेण प्रतिपादितम् ।

**कार्तिकेयः –** कालिदाससाहित्ये पौराणिकदेवतासु कार्तिकेयस्य व्यक्तित्वमपि विवेचितम्। कार्तिकेयः शिवस्यात्मजःदेवसेनापतिश्चास्ति।कालिदासेन कुमारसम्भवमहाकाव्ये कार्तिकेयस्य जन्मकथैव वर्णिता ।कार्तिकेयःषड्कृर्तिकानां स्तनपानेन पुष्टोऽभवत् अतएव षडानन नाम्नाऽभिज्ञायते। रघुवंशस्य श्षडाननापीतपयोध रासु नेता । चमूनामिव कृत्तिकासु ....'–39 इति श्लोकांशेन मतमिदमुद्घाटितं भवति ।'तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः'...40 तथा च–स्कन्देन साक्षादिव देवसेनाम् ...41 इत्यनेन तस्य सेनापतित्वं सूचितम्। कार्तिकेयस्य 'विजित्वरं' नामको रथोऽस्ति। रथोऽयं मनसोऽपि तीव्रगामी विजयं प्रदातारोऽस्ति । यथोच्यते –**स दुर्निवारं मनसोऽतिवेगिनं**

**जयश्रियः सन्नयनं सुदुः सहम् ।**
**विजित्वरं नाम तदा महारथं**
**धनुर्धरः शक्तिधरोऽध्यरोह यत्।।–42**

रघुवंशे कालिदासः कार्तिकेयस्य वाहनविषये वर्णितवान् तदनुसारं तस्य वाहनं मयूरो वर्तते । कार्तिकेयः मयूरपृष्ठासीनो भूत्वा आवागमनं करोति। यथोक्तम् – भूयिष्ठमासीदुपमेय कान्तिर्मयूरपृष्ठाश्रयिणा गुहेन . ...43 कार्तिकेयः कौञ्चपर्वतस्य छेदनं कृतवान्। कालिदासेन श्नगरन्ध करौजसः' इत्यनेन प्रसङ्गोऽयं प्रतिपादितः।

**कालिदाससाहित्ये अवतारीदेवताः –**

'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत.... श्रीमद्भगवद्गीतायामुल्लिखितेनानेन श्लोकेन अवतारवादस्य प्रयोजनं स्पष्टं भवति। दुष्टदमनाय धर्मसंस्थापनाय च प्रत्येकेऽस्मिन् युगे भगवान् अवतारं गृह्णाति। प्रस्तुतवैदिकऋचि अपि भगवतः कर्तव्योऽयमुद्घोषितः –

'प्रतियुगं वपुर्धत्ते त्रिविक्रमादिकं हरिः गोपां मेधातिथिर्ब्रूते विष्णुं धर्मस्य रक्षकम्।'– 44 पुराणेषु अवताररतत्वं अतीवविस्तृततया विवेचितम। तत्र चतुर्विंशत् तथा च पञ्चाशत् अवताराणामुल्लेखः प्राप्यते ।परं दशावतारः विशेषतया प्रसिद्धोऽस्ति। कालिदाससाहित्ये दशावतारेषु वराह-वामन-रामादीनां विवेचनमवलोक्यते तद्यथा –

**वराहः –** कालिदासः वराहावतारस्य वर्णनं कुर्वन्लिखितवान् प्रलयकाले वराहः सागरं तीर्त्वा अग्रेसरति यथा एतस्य विषये रघुवंशे वर्णितम् – महावराहःकल्पक्षयोद्वृत्तमिवार्णवाम्भः –45पुराकाले दैत्यराजो हिरण्याक्षः पृथ्वीं रसातले नीतवान् तदा वराहेण पृथ्वी उद्धृता। कालिदासेनाधोलिखिते श्लोके वराहावतारस्य प्रयोजनं प्रतिपादितम् –

**रसातलादिभवेन पुंसाभुवः प्रयुक्तोद्वहनक्रियायाः ।**
**अस्याच्छमम्भः प्रलयप्रवृद्धंमुहूर्त वक्त्राभरणं बभूव ।।–46**

पुनश्चास्मिन् श्लोकेऽपि उद्देश्योऽयं स्पष्टो भवति-**तत्रेश्वरेण जगतां प्रलयादिवोर्वी-47**

कालिदासः कुमारसम्भवे कथितवान् यत् प्रलयकाले महावराहः पृथ्वीं स्वदंष्ट्रायां निधायउद्धृतवान। आसक्तबाहुलतया सार्धमुद्धतया भुवा ।

**महावराहदंष्ट्रायां विश्रान्ताः प्रलयापदि ।।48**

**वामनः –**

वामनावतारे भगवान् विष्णुः स्वपादत्रयेण अखिल लोकं मापितवान् । महाकविकालिदासः वामनावतारमित्थं वर्णितवान् – ''वसुन्धरा विष्णुपदं द्वितीयमध्यारुरोहेव रजश्छलेन।''– 49

**रामः –**

रामः विष्णो अवतारोऽस्ति। रावणविनाशार्थं विष्णुः रामरूपेऽवतरितवान्। रामावतारस्य प्रयोजनं प्रकटयन् कालिदासेन प्रतिपादितं यत् –

**धातारं तपसा प्रीतं ययाचे स हि राक्षसः ।**
**दैवात्सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मुखः ।।**
**सोऽहं दाशरथिर्भूत्वा रणभूमेर्बलिक्षमम।**
**करिष्यामि शरैस्तीक्ष्णैस्तच्छिरः कमलोच्चयम् ।।–50**

राजा दशरथः पुत्रकामनया पुत्रेष्टियज्ञं कृतवान्। यज्ञाग्निकुण्डात् धृतपायसस्वर्णपात्रं दिव्यपुरुषः प्रकटितोऽभवत्। तस्मिन् पायसे विष्णोः तेजस्समाहित आसीत् येन रामजन्म अभूत्। रघुवंशे प्रसङ्गोऽयं एवं प्रस्तुतम् –

**हेमपात्रगतं दोर्भ्यामादधानः पयश्चरुम्।**
**अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहम्।।**
**स तेजो वैष्णवं पत्न्योर्विभेजे चरुसंज्ञितम्।–51**

कालिदासेन 'राम' इति नामस्य सार्थकतां प्रकाशयन् प्रतिपादितं यत् रामस्य सुन्दरस्वरूपमवलोक्य कुलगुरुणा वशिष्ठेन रामेति नाम्नाऽभिहितम। यथा कथितमस्ति –

**राम इत्यभिरामेण वपुषा तस्य चोदितः**
**नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम् ।।–52**

कालिदासः रघुवंशे रामस्य कृते श्काकपक्षधारीश इत्यस्य विशेषणस्य प्रयोगं कृतवान् ।

**कालिदाससाहित्ये प्राकृतिकदेवताः**

कालिदाससाहित्ये पृथ्वी-जल-तेज-वायु-आकाश-सूर्य-चन्द्रादि प्रकृतिपरक देवानामपि सुन्दरी स्तुति वर्तते। सन्दर्भेऽस्मिन् अभिज्ञानशाकुन्तलस्य मङ्गलाचरणं दृष्टव्यमस्ति –

**या सृष्टिः स्रष्टुराद्या वहति।विधिहुतं या हविर्या च होत्री**
**ये द्वे कालं विधत्तःश्रुतिविषयगुणा या स्थिता व्याप्त विश्वम्।**
**यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः**
**प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः।।53**

कालिदासकाव्येषु प्रकृत्याधारितदेवानां चित्रणमित्थं वर्तते ।

**सूर्यः –** सर्वविदितमस्ति यत् सूर्यदेवः वृष्टिप्रक्रियायां सहयोगं विदधाति कालिदासेन विषयेऽस्मिन् निगदितं यत्सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः....54 'प्रतापात्तपनो यथा'–55 इत्यनेन सूर्यस्य श्तपनश इत्यभिधानस्य सार्थकतामप्रकटयत्। सूर्यदेवः स्ववायुवेगगामीअश्वैभ्यः अखिललोके अग्रेसरति। यथा रघुवंशे भणितमस्ति – पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः...–56

**चन्द्रः –** चन्द्रोत्पत्तिविषये मतद्वयं शास्त्रसम्मतमस्ति। प्रथममतानुसारेण चन्द्रोत्पत्तिः क्षीरसागरात् सञ्जाता। अपरमतेन अत्रिऋषेः नेत्राभ्याम् चन्द्रःसमुद्भवः । रघुवंशेन मतद्वयस्य पुष्टि भवति। अत्र क्षीरसागरात् चन्द्रोत्पत्तिचर्चा एवं चित्रितास्ति –

**दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव–57**

एवमेव अत्रिनेत्राभ्याम् समुत्पन्नस्य मयंकस्य प्रमाणप्रसङ्गे प्रतिपादितम् यत्–

**अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः..–58**

दक्षशापात् चन्द्रः क्षयरोगग्रस्तोऽभवत् अस्मात् कारणात् तस्य कलाः क्षीयते वर्धते च। कालिदासः उक्त तथ्यस्य संकेतमेवं प्रदत्तवान् –**'दक्षशाप इव चन्द्रमक्षिणोत्'......59**

**पृथ्वी –** पृथ्व्याः स्वरूपस्य कल्पनां विधाय कालिदासेन निगदितं यत् सर्पफणस्थितसिंहासने विराजमानास्ति वसुन्धरा। तथा च सा रत्नाकरस्वरूपकरधनी धारयति ।

कथितं च – **तत्र नागफणोत्क्षिप्तसिंहासन निषेदुषी।**
**समुद्ररशना साक्षात्प्रादुरासीद्वसुन्धरा ।।–60**

**गङ्गा–** प्राकृतिकपदार्थेषु नदीनां महत्तायाः प्रतिपादनं कुर्वन् कालिदासोल्लिखितवान् नद्यः पवित्रतमाः भवन्ति। गङ्गायमुनासदृशी पूतसरित्स्नानेन नराः मोक्षमवाप्नुवन्ति ।

यथा गङ्गावगाहनस्य फलं कालिदासेन इत्थं प्रतिपादितम् –

**समुद्रपत्न्योर्जलसन्निपाते।पूतात्मनामत्र किलाभिषेकात्।।**
**तत्त्वावबोधने विनापि ।भूयस्तनुत्यजां नास्ति शरीरबन्धः ।।–61**

कालिदासेन वर्णितं यत् मन्दाकिनी महादेवमस्तके मालासमा सुशोभिता भवति। इयं नदी चित्रकूट पर्वते अत्रिपत्नीअनुसूययाः प्रार्थनया प्रकटिताऽभवत। यथोक्तं रघुवंशे –

**अत्राभिषेकाय तपोधनानां।सप्तर्षिहस्तोद्धृतहेमपद्माम्।।**
**प्रवर्तयामास किलानुसूया ।त्रिस्रोतसं त्र्यम्बकमौलिमालाम् ।–62**

त्रिपथगा पापनाशिनी, मोक्षप्रदायिनी, तथा च विष्णुपादपङ्कजोद्भवा वर्तते। गङ्गाप्रादुर्भावविषये कुमारसम्भवे कथितमस्ति –

**महेश्वर जटाजूटवासिनी पापनाशिनी।**
**सागरान्वयनिर्वाणकारिणी धर्मधारिणी।**
**विष्णुपादोककोद्भूता ब्रह्मलोकादुपागता**
**त्रिभिः स्रोतोभिरश्रान्तं पुनानाभुवनत्रयम्।**

कुमारसम्भवे भागीरथी शिवस्य जलमयीमूर्तिरूपेऽपि चित्रिता वर्तते। शम्भोर्म्भोमयी मूर्तिः सैव देवी सुरापगा–63

**पर्वतः –** कालिदाससाहित्ये प्राकृतिकदेवतासु पर्वतानामपि वर्णनं प्राप्यते। क्रमेऽस्मिन् कुमारसम्भवे हिमालयपर्वतं देवरूपे प्रतिपादयन् कालिदासेन कथितम् –

**अस्त्युत्तरस्यां दिशि देवतात्माहिमालयो नाम नगाधिराजः ।–64**

स्वयं ब्रह्मा हिमालयं 'पर्वतराज' रूपे प्रतिष्ठितवान् तथा च यज्ञभागे अधिकारं प्रदत्तवान। यतो हि सः यज्ञसामग्र्याः उत्पादनं करोति पृथ्वीं धारयति च। कालिदासेन हिमालयस्य शैलाधिपत्यं गिरिराजशब्दस्य सार्थकतां च चित्रितं यथा –यस्यार्थयुक्तं गिरिराजशब्दं कुर्वन्ति ।

**बालव्यजनैश्चमर्यं .....65**

**यज्ञाङ्गयोनित्वमवेक्ष्य यस्यसारं धरित्रीधरणक्षमं च ।**
**प्रजापतिः कल्पितयज्ञभागंशैलाधिपत्यं स्वयमन्वतिष्ठत।।–66**

कुमारसम्भवे हिमालयस्य पारिवारिकपरिचयोऽपि प्राप्यते तदनुसारं हिमालयः वंशवृद्धयर्थं पितृणां मनसि समुत्पन्नां 'मेना' नाम्नी कन्यां परिणीतवान् यथोच्यते–

स मानसीं मेरुसखः पितृणांकन्यां कुलस्य स्थितये स्थितिज्ञः ।

**मेनां मुनीनामपि माननीयांआत्मानुरूपां विधिनोपयेमे।।–67**

हिमालयस्य पुत्रः मैनाकोऽभवत् अस्य विवाहः नागकन्यया साकं सञ्जातः।

**असूत् सा नागवधूपयोग्यंमैनाकमम्भोनिधिबद्धसख्यम्।–68**

हिमालयः पार्वत्याः पिताऽस्ति तथा च शिवस्य श्वसुरः इत्यनेन तस्य देवत्वं महत्वञ्च प्रमाणितम्।

कुले प्रसूतिः प्रथमस्य वेधसः.. पार्वत्युत्पत्ति प्रसङ्गे कथनेनानेन श्लोकांशेन स्पष्टमस्ति यत् हिमालयो ब्रह्मणः वंशजो वर्तते।इत्थं उपर्युक्तवर्णनेन स्पष्टं यत् कालिदाससाहित्ये वैदिक-पौराणिक-अवतारी-प्राकृतिकदेवानामवधारणा स्फुटी भवति येन सुधीजनाः सामाजिकाश्च देवतानां स्वरूप-आयुध-वाहन-पारीवारिकविषये च ज्ञानमाप्नुवन्ति।

**सन्दर्भाः –**


1.विष्णुधर्मोत्तरपुराण-3/288/1 ,2
2.श्रीमद्भागवतपुराण-2/3/2–7
3.रघुवंश – 3/49
4.रघुवंश – 3/56
5.रघुवंश – 3/4
6.रघुवंश- 3/23
7.कुमारसम्भव – 13/48
8.रघुवंश – 3/43 ,44
9.कुमारसम्भव–2/29
10.रघुवंश – 3/60
11.रघुवंश – 4/40
12.रघुवंश –9/12
13.रघुवंश–17/32
14.कुमारसम्भव – 2/47
15.रघुवंश – 1/2
16.कुमारसम्भव – 2/46
17.कुमारसम्भव – 14/6
18.रघुवंश – 1/56
19.रघुवंश – 2/9
20.रघुवंश–9/6
21.कुमारसम्भव–2/21
22.कुमारसम्भव – 14/ 9
23.कुमारसम्भव – 2 /14
24.कुमारसम्भव – 6/9
25.कुमारसम्भव – ६
26.रघुवंश- 3/27
27.रघुवंश–3/49
28.रघुवंश- 10/16
29.रघुवंश–17/29
30.रघुवंश–10/ 6–13
31.रघुवंश–10/21
32.रघुवंश – 10/36
33.रघुवंश –3/23
34.रघुवंश – 3/49
35.कुमारसम्भव – 1/21
36.कुमारसम्भव – 3/10
37.कुमारसम्भव – 5/66–68
38.कुमारसम्भव – 12/15–17
39.रधुवंश- 14/22
40.कुमारसम्भव –2/ 61
41.रघुवंश–7/1
42.कुमारसम्भव – 14/
43.रघुवंश – 6/4
44.ऋक.1/22/18
45.रघुवंश – 7/56
46.रघुवंश – 13/8
47.रघुवंश – 13/77
48.कुमारसम्भव – 6/ 8
49.रघुवंश –16/28
50.रघुवंश – 10/43–44
51.रघुवंश – 10/51 ,54
52.रघुवंश –10/67
53.अभिज्ञानशाकुन्तलम् –1/1
54.रघुवंश – 1/18
55.रघुवंश – 4/12
56.रघुवंश–3/30
57.रघुवंश – 1/12
58.रघुवंश – 2 /75
59.रघुवंश- 19/48
60.रघुवंश – 15/23
61.रघुवंश- 13/58
62.रघवंश – 13/51
63.कुमारसम्भव – 10/26
64.कुमारसम्भव –1/1
65.कुमारसम्भवम् – 1/13
66.कुमारसम्भवम् – 1/17
67.कुमारसम्भवम् – 1/18
68.कुमारसम्भव – 1/20

# संपूर्णविश्वस्य अस्थायाः केन्द्रं वर्त्तते गोस्वामीतुलसीदास विरचितः रामचरितमानसग्रन्थः- डॉ.रमेशशुक्लः

डॉ.दिनेश चौबे, उज्जयिनी। गोस्वामीतुलसीदास जयन्त्यवसरे उज्जयिनीस्थस्य महर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य आधुनिकविभागस्य तत्वाधानेन योगेश्वरश्रीकृष्णभवने गोस्वामीतुलसीदासस्य साहित्ये लोकमङ्गलम् इति विषये विशिष्टव्याख्यानस्य आयोजनं जातम् । १२.८.२०२४ तमे दिनाङ्के सायं ४:३० वादनतः आयोजिते कार्यक्रमे मुख्यवक्तृरुपेण श्रीमहाकालेश्वरवैदिकशोध संस्थानम् ,उज्जयिनी इत्यस्य व्याकरणविभागस्य व्याख्याता डॉ. रमेशशुक्लवर्यः उक्तवान् यत् तुलसीदासः जनहिताय रामकथामलिखत एवञ्च आदर्शजीवननैतिकतारामचरितस्य महत्त्वमिति प्रेम्णः प्रतीको वर्तते रामचरितम्।



तेन सगुन-निर्गुण-रूपयोः रामस्य स्तुतिं कृत्वा भक्ते प्राधान्यम् प्रस्तुतम् अस्ति । ज्ञानभक्तिमार्गस्य समन्वयात्मकः कविः वर्त्तते बाबा तुलसी तस्य ग्रन्थः भारतस्य हि नहि अपितु सम्पूर्णविश्वस्य जनानां विश्वासकेन्द्रम् अस्ति। रामकथा अस्मान् अपमार्गात् सम्यक् मार्गं प्रति नेतुं वर्तते। अध्यक्षः कुलगुरुः प्रो. विजयकुमारसीजीमहोदयेन उक्तं यत् महाकविः तुलसीदासः सामाजिकचेतनां प्रकाशयितुं अद्भुतं समन्वयं काव्यात्मकं चातुर्यं च प्रस्तुतवान् । गोस्वामी तुलसीदासः त्रिकालदर्शी कविः अस्ति, तेन एतावत् सुन्दरं चित्रणं कृतं यत् अद्य तस्य ग्रन्थं गृहे गृहे जनाः आदरेण पठन्ति। बाबातुलसी भगवतः श्रीरामस्य जीवनं सामान्यजनपर्यन्तं प्रसारयितुं कार्यं कृतवान् अत एव अद्य समाजे तस्य विषये विशेषः विश्वासः अस्ति। साहित्य विभागाध्यक्ष डॉ. तुलसीदास परोहामहोदयः तुलसीदासः तथा च तस्य काव्यात्मकसौन्दर्यं दृष्टपथी कुर्वन् कार्यक्रमस्य परिचयं स्वागतभाषणं च कृतवान्। आधुनिकविभागाध्यक्षेन डॉ. अखिलेशकुमारद्विवेदीमहोदयेन प्रास्ताविकं प्रस्तुतम्। डॉ. अनुरुध त्रिपाठी गोस्वामी तुलसीदासेन लिखितश्लोकानां पाठं कृतवान्। संचालनं हिन्दी प्राध्यापिका डॉ. अनीता अग्रवाल कृतवती। कार्यक्रमे डॉ. शुभम शर्मा, डॉ. अनिलमुवेल, डॉ. अजयराठी अन्ये प्राध्यापकाः, छात्राः कर्मचारीगणाः उपस्थिताः आसन्। आभारप्रदर्शनं आङ्ग्लशिक्षकेन वेदांशुगौतमेन कृतम्।




# कुलपतिः प्रो. हरेराम-त्रिपाठी 'ब्रह्मानंद सरस्वती' पुरस्कारेण सभाजितः

वाराणसी ( डॉ. रेणुकाबोकारे ) कविकुलगुरुः कालिदाससंस्कृतविश्वविद्यालयस्य, रामटेकस्य माननीयः कुलपतिः भारतीयदर्शनस्य न्यायशास्त्रस्य च प्रख्यातविद्वान् प्रो. हरेराम-त्रिपाठी उत्तरप्रदेशस्य नागकूप-शास्त्रार्थ-समिति द्वारा श्री ब्रह्मानंद-सरस्वती सम्मानेन सभाजितः।

वाराणस्याः बनारस-हिंदू विश्वविद्यालये आयोजिते एकस्मिन् कार्यक्रमे नागकूप-शास्त्रार्थ समितेः अध्यक्षः वरिष्ठसंस्कृत विद्वान् च, पद्मविभूषणः प्रो. वसिष्ठ-त्रिपाठी महोदयस्य करकमलाभ्यां मा. कुलगुरुः प्रो. हरेराम त्रिपाठिने पारंपरिक-शास्त्रसेवायां संस्कृतस्य क्षेत्रे च तस्य योगदानाय विभिन्नैः पुरस्कारैः सभाजितः। अस्य पुरस्कारस्य स्वरूपं 51000/- रूप्यकाणि, प्रमाणपत्रं सम्मानचिह्नं च।



संपूर्णानंद-संस्कृतविश्वविद्यालयः, वाराणस्याः कुलपतिः बिहारीलालशर्मा, महामंडलेश्वरः संतोषदासः सातुबाबा, अन्नपूर्णामंदिरस्य महंतः शंकरपुरी, स्वामी जीतेंद्रानंद-सरस्वती विशेषरूपेण उपस्थिताः आसन्। धर्मसंघस्य पीठाधीश्वरः ब्रह्मचारी शंकरदेवः चौतन्यः कार्यक्रमस्य अध्यक्षः आसीत्।

प्रो. हरेराम-त्रिपाठी भारतीयदर्शनस्य, नवान्यायस्य, सांख्ययोगस्य, न्यायशास्त्रस्य च प्रख्यात-विद्वान् दार्शनिकः च अस्ति। प्रो.त्रिपाठी संस्कृतक्षेत्रे तस्य उत्कृष्टयोगदानाय भारतसर्वकारेण महर्षिबदरायणः राष्ट्रपतिपुरस्कारः, शंकरवेदांतपुरस्कारः, पाणिनीसम्मानं, उत्तरप्रदेशसंस्कृतसंस्थानस्य विशिष्टसेवापुरस्कारेण सहितं बहूनि सम्मानानि प्राप्तम्। प्रो. हरेराम-त्रिपाठी इमानि सम्मानानि प्राप्तुं विश्वविद्यालयस्य कुलसचिवः प्रो. कृष्णकुमारपांडे सर्वे सदस्याः शुभकामनाः दत्तवन्तः।

# पार्वती-आर्य-कन्या-संस्कृत-उच्चतरमाध्यमिक-विद्यालये स्वतंत्रता-पर्व उत्साहेन समाचरितम्

बदांयू। पार्वती आर्य कन्या संस्कृत उच्चतरमाध्यमिक विद्यालये स्वतंत्रता पर्व उत्साहेन समाचरितम्। विद्यालयस्य प्रधानाचार्यः प्रबंध समितिश्च ध्वजारोहणं विधाय राष्ट्रगानम् अगायताम्। अवसरेस्मिन् छात्राभिः मनमोहक देशभक्ति पूर्ण मनमोहक सांस्कृतिक कार्यक्रमाः प्रस्तुताः। विद्यालयस्य प्रबंधिका श्रीमती प्रतिभा मिश्रा, अध्यक्षः श्री सर्वेश कुमार पाठकः अन्ये सर्वे सम्मानित सदस्याः विद्यालयस्य संस्थापिका श्रीमती पार्वती



देवी सरस्वतीं देवीं पुष्प अर्पणेन समर्च्य कार्यक्रमस्य शुभारंभम् अकुर्वन् स अवसरेस्मिन् छात्राभिः संस्कृत गीतानि, देशभक्ति कविताः, स्वतंत्रता गाथाः काकोरी कांडसंबद्ध विचारान् च प्रस्तुतीकृतवत्यः। प्रबंध समितेः सर्वे सम्मानित पदाधिकारिणः स्वतंत्रतायाः पावनावसरे देश प्रेम देशभक्ति पूर्ण विचारैः छात्रेभ्यः देशं प्रति स्व कर्तव्यानि पालयितुं जागरितवान्। बोर्डपरीक्षायां सर्वोच्च अंक प्राप्तवद्भ्यच्छात्रेभ्यः प्रमाण पत्राणि दत्वा विद्यालय द्वारा ते सम्मानिताः। कार्यक्रमस्य संचालनं श्रीमती गीतांजलिः कृतवती। कार्यक्रमेस्मिन् विद्यालयस्य सर्वाः शिक्षिकाः, कर्मचारिणश्च उपस्थिताः आसन्स।

## प्रथमपुटस्य शेषभागः उत्तराखण्डविद्वत्सभा, भगवद्धामाश्रमः...

टपकेश्वर-महादेव-मंदिरे तमसा नद्याः तटे उपाकर्म संपत्स्यते। आचार्यः जगनयनः बहुखंडी, आचार्यः शिवनारायणः बिंजोला शास्त्रीय विधिना एतत् अनुष्ठानं सम्पादितवन्तौ। महासचिवः दिनेशभट्टः उक्तवान् यत् सभा सदैव परमार्थिक-सहयोगं करोतिस प्रवक्ता मुकेशपन्तः अस्मिन् अवसरे आश्रमपरिसरस्य विद्वज्जनेभ्यः अमृतकुंभस्मारिकायाः संध्या-विशेषांकं प्रदत्तवान्। स्वामी समस्त ब्रह्मचारिभ्यः सदुपदेशं दत्तवान्। अस्मिन् अवसरे धीरज-मैठाणी सहितं अंश-रतूड़ी, अंश-जोशी, अंश-शर्मा, सुधांशु थपलियालः, सार्थकः, अक्षितः बडोनी, योगेशः बड़सीलिया, ऋषभः बंदुनी, आयुष्मानः, कुणालः, दीक्षांतः, रिदमः, कृष्णा, अमनपाठकः, विपिनपंतः इत्यादि बटुकब्रह्मचारिणः आश्रमस्थ अन्ये छात्राः, कर्मचारिणः, अभिभावकाः सभायाः सदस्याः उपस्थिताः आसन। अस्य विशिष्टानुष्ठानस्य हेतोः उपाध्यक्षः इत्यादि पदाधिकारिणः कार्यकारिणः शुभकामनान् प्रदाय मंगलाशासनं कृतवन्तः।

अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी, प्रो.(डॉ.)अजितकुमारजैनः
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।